श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्गोपालार्य महादेशिकैः अनुगृहीतम्

# ॥ श्री अपर्याप्तामृतमङ्गळाशासन स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महादेशिकाय नमः

श्रीमते गोपालार्य महादेशिकाय नमः

# ॥ श्री अपर्याप्तामृतमङ्गळाशासन स्तोत्रम् ॥

श्रीकृष्ण देशिक पदाम्बुज भृङ्गराजं
वेदान्त लक्ष्मणमुनीन्द्र कृपात्त बोधम्।
त्रय्यन्तदेशिक-यतीन्द्र-शठारि मूर्तिं
गोपालदेशिकशिखामणिमाश्रयामः॥

शठरिपुमुनि सूक्ति श्रीमदाम्नाय वाचां
अकृतक वचनानां चातिकल्याण घोषैः।
अनुदिनं अभिवृद्धां आगमान्तार्य सूक्त्या
श्रियं उपचिनु शार्ङ्गिन् वैदिकेऽस्मिन् विमाने॥ १॥

महित विहित वेदान्तार्य सम्मान शीलां
अपगत तदमित्रां अद्भुतैरासमेताम्।
निरवधि धन धान्यां उत्सवैः स्त्यानहर्षां
श्रियं उपचिनु शार्ङ्गिन् वैदिकेऽस्मिन् विमाने॥ २॥

श्री शार्ङ्गपाणे यदि ते परत्वं
सत्या यदि स्यात् श्रुतिरत्र मानम्।
वेदान्त सूरौ द्विषतो जनांस्त्वं
श्री कुम्भघोणे विनिवारयाशु॥ ३॥

पश्येम शार्ङ्गिन्! शरदां शतं त्वां
पर्याप्तिहीनामृत नामधेयम्।
श्रीकुम्भघोणे नगरोत्तमेऽस्मिन्
निर्व्याकुलाश्चैव निरामयाश्च॥ ४॥

॥ इति श्री अपर्याप्तामृतमङ्गळाशासन स्तोत्रं संपूर्णम्॥



www.prapatti.com